Topic 20

# समानाधिकरण कर्मधारय समास - 2

कतरकतमौ जातिपरिप्रश्ने कतरकठः । कतमकलापः।
'गोत्रं च चरणैः सह' इति जातित्वम्।

कतरकतमौ । जातिपरिप्रश्ने गम्ये कतरकतमौ समानि समानाधिकरणेन समस्येते इत्यर्थः । कतरकठ इति । 'अनयोः कः कठ इत्यर्थः। 'किंयत्तदोर्निर्धारणे द्वयोरेकस्य डतरच्' कठेन प्रोक्तमधीते कठः।

किं क्षेपे । कुत्सितो राजा किंराजा, यो न रक्षति।

किं क्षेपे । क्षेपो निन्दा । तत्र गम्ये किमित्यव्ययं समानाधिकरणेन समस्यते, स तत्पुरुषः इत्यर्थः। कुत्सितो राजेति । अस्वपद-विग्रहोऽयम् । किम्पदस्थाने कुत्सितपदमिति ज्ञेयम्, वाक्येन निन्दानवगमेन स्वपदलौकिकविग्रहासम्भवात्। किंराजेति । 'राजाहस्सखिभ्यः —' इति टच् तु न, 'किमः क्षेपे' इति निषेधात्। ननु राज्ञो बहुसम्पत्तिशालिनः कथं कुत्सितत्वमित्यत आह - यो न रक्षतीति । स किंराजेत्यन्वयः।

पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः।

पोटायुवतिः । पोटादिभिः समानाधिकरणैर्जातिवाचकं समस्यते, स

तत्पुरुष इत्यर्थः । अत्र कर्मधारयकार्यं कथम्
कर्मधारयसंज्ञामाह – तत्पुरुषः समान ।